No. १२८३ क

Title पुरुषसूक्त पूजनम्

Author

Extent ३ पत्र Age

Subject धर्मशास्त्र

नं. १२८३ [illegible]

नं० ११६ २२०

[illegible]

स. १

ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् स
भूमिꣳ सर्वतस्पृत्वा त्यतिष्ठद्दशांगुलम् वामकरे
१ पुरुष एवेदꣳ सर्वं यद्भूतं यच्च भाव्यम् उतामृ
तत्वस्येशानो यदन्नेनातिरोहति २ दक्षिणकरे प्
तावानस्य महिमा तोज्यायांश्च पूरुषः पादोस्यावि
श्वाभूतानि त्रिपादस्यामृतन्दिवि वामपादे ३ त्रिपा
दूर्द्ध उदैत्पुरुषः पादोस्येहाभवत्पुनः ततो विष्वङ्व्य
क्रामत्साशनानशने अभि ४ दक्षिणपादे ततो वि

राडजायतविराजोऽअधिपूरुषः सजातोऽअत्यरिच्य
त पश्चाद्भूमिमथोपुरः ५ वामजानौ तस्माद्यज्ञात्स
र्वहुतः सम्भृतं पृषदाज्यं पशूँस्ताँश्चक्रे वायव्या
नारण्याग्राम्याश्च ये ६ दक्षिणजानौ तस्माद्यज्ञा
त्सर्वहुतऽऋचः सामानि यज्ञिरे छन्दाꣳसि यज्ञिरे
तस्माद्यजुस्तस्मा दजायत ७ वामकर्णे तस्माद
श्वाऽअजायन्त येकेचोभयादतः गावोहयज्ञिरे
तस्माज्जाताऽअजावयः ८ दक्षिणकर्णे तंयज्ञं

न्वर्हिषिप्रौक्षन्पुरुषञ्जातमग्रतः तेनदेवाऽअयजं
तसाध्याऋषयश्चये ९ नाभौ यत्पुरुषंव्यदधुः कति
धाव्यकल्पयन् मुखङ्किमस्यासीत्किम्बाहू किमूरू
पादाऽउच्येते १० हृदि ब्राह्मणोस्य मुखमासीद्बाहूराज
न्यः कृतः ऊरू तदस्य यद्वैश्यः पद्भ्यांशूद्रोऽअजाय
त ११ कंठे चन्द्रमा मनसोजात श्चक्षोः सूर्योऽअजा
यत श्रोत्राद्वायुश्चप्राणश्च मुखादग्निरजायत
१२ वामबाहौ नाभ्याऽआसीदन्तरिक्षंशीर्ष्णोद्यौः

समवर्त्तत पद्भ्यां भूमिर्द्दिशः श्रोत्रात्तथा लोकाँ
ऽअकल्पयन् १३ दक्षिणबाहौ यत्पुरुषेण हविषा
देवायज्ञमतन्वत वसन्तोस्यासीदाज्यङ्ग्रीष्मऽइध्मः
शरद्धविः १४ मुखे सप्तास्यासन्परिधयस्त्रिःसप्तस
मिधःकृताः देवायद्यज्ञन्तन्वाना अबध्नन्पुरुषं।
पशुम् नेत्रयोः १५ यज्ञेन यज्ञमयजन्त देवास्ता
नि धर्म्माणि प्रथमान्यासन् तेहनाकं महिमा
नः सचन्तयत्र पूर्वे साध्याः सन्ति देवाः १६ शिरसि